
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

4834

॥श्रीगणेशाय नमः॥ अथ वृत्तरत्नाकरछंदस
लिख्यते॥ सुखसंतानसिद्ध्यर्थं नत्वा ब्रह्माच्यु
तार्चितं॥ गौरीविनायकोपेतं शंकरं लोकशं
करं॥१॥ वेदार्थशैवशास्त्रज्ञः पव्येकोभूद्द्विजोत्त
मः॥ तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः
॥२॥ तेनेदं क्रियते छंदोलक्ष्यलक्षणसंयुतम्॥ वृत्त
रत्नाकरं नाम बालानां सुखबुद्धये॥३॥ पिंगला
दिभिराचार्यैर्यदुक्तं लौकिकं द्विधा॥ मात्रावर्ण

Acc. No. 4834
Title - वृत्तरत्नाकर
Author - केदारभट्ट
Date - संवत् - 1874
Subject - छन्दशास्त्र
folio - 20
Xerox - 39
Scribe - पंडितचतुर्भुज

॥२॥

विभेदेन छंदस्तदिह कथ्यते ॥४॥ षडध्यायनिबद्ध
स्य छंदसोऽस्य परिस्फुटं ॥ प्रमाणमिति विज्ञेयं षट्
त्रिंशदधिकं शतं ॥५॥ म्यरस्तजभ्नगैर्लांतैरेभिर्द
शभिरक्षरैः ॥ समस्तवाङ्मयं व्याप्तं त्रैलोक्यमिव वि
ष्णुना ॥६॥ सर्वगुर्मो मुखांतलौ यरावंतगलौ सतौ ॥
ग्मध्याद्यौ ज्रौ त्रिलो नोष्टौ भवंत्यत्र गणास्त्रिकाः
॥७॥ उक्तं च ॥ म्रा दिमध्यावसानेषु यरता यांति
लाघवं ॥ भजसा गौरवं यांति मनौ तु गुरुलाघवं ॥८॥

॥२॥

ज्ञेयाः सर्वादिमध्यांतगुरुर्वोत्र चतुष्कलाः॥ गणाश्च
तुर्लघूपेताः पंचार्यादिषु संस्थिताः॥९॥ सानुस्वारो
विसर्गांतो दीर्घो युक्तपरश्च यः॥ वा पादांतस्त्वसौ ग्व
क्रो ज्ञेयोन्यो मात्रिको लघुः॥१०॥ पादादाविह व-
र्णस्य संयोगः क्रमसंज्ञकः॥ पुरः स्थोतेन तेनस्याल्ल
घुतापि क्वचिद्गुरोः॥११॥ इदमस्योदाहरणं॥ तरु-
णं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि॥
अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्टमश्नाति॥ २

॥३॥

3

॥२॥

अब्धिभूतरसादीनां ज्ञेयाः संख्यास्तु लोकतः ज्ञेयः
पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञिका ॥३॥ युक्सम
विषमं वाऽयुक्स्थाने सद्भिर्निगद्यते । सममर्द्धस
मवृत्तं विषमं च तथापरं ॥४॥ अंघ्रयो यस्य चत्वार
स्तुल्यलक्षणलक्षिताः ॥ तच्छंदः शास्त्रतत्वज्ञाः सम
वृत्तं प्रचक्षते ॥५॥ अंघ्रयो यस्य चत्वारस्तुल्यल
प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत् ॥
द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसममुच्यते ॥६॥ यस्य

॥२॥

पादश्चतुष्केपि उक्तमभिन्नंपरस्परं॥ तदाऽकुर्विषम-
मंवृत्तंछंदःशास्त्रविशारदाः॥१७॥ आरभ्यैका
क्षरात्पादादेकैकाक्षरवर्द्धितैः॥ पृथक्छंदोभ
वेत्यादैर्यावत्षड्विंशतिंगतं॥१८॥ तदूर्ध्वंचंडवृष्ट्या
द्विदंडकाःपरिकीर्तिताः॥ शेषागाथास्त्रिभिःषड्भिश्च
रणैश्चोपलक्षिताः॥१९॥ उक्ताऽत्युक्तातथामध्या
प्रतिष्ठान्यासुप्रतिष्ठासुपूर्विका॥ गायत्र्युष्णिगनुष्टु
प्चबृहतीपंक्तिरेवच॥ त्रिष्टुपैचजगतीचैवतथाऽतिज

॥३॥

गतीमता। शाक्करीसाऽतिसक्करीतिपूर्वीस्याद्ऽष्ट्रऽत्य
ऽष्टीतथास्मृते॥२१ धृतिश्चाऽतिधृतिश्चैवकृतिः प्र
कृतिराकृतिः॥ विकृतिःसंस्कृतिश्चापिप्रोक्ताभिकृति
रुत्कृतिः॥२२ इत्येताश्छंदसांसंज्ञाःक्रमशोवच्मि
सांप्रतं। लक्षणंसर्ववृत्तानांमात्रावृत्तानुपूर्वकं॥२३॥
इतिवृत्तरत्नाकरेसंज्ञाविधानोनामप्रथमोध्याय
॥छ॥ लक्ष्मैतत्सप्तगणागोपेताभवतिनेहविषमेजःष
ष्टोऽयंनलघुवाप्रथमेऽर्धेनियतमाऽऽर्यायाः॥१॥

॥३॥

इसवृत्तकागण॥ऽऽ०ऽऽ०॥ऽ०ऽऽ०ऽ॥०।ऽ।०॥ऽ०ऽ०
॥ऽऽ०ऽ॥०ऽऽ०॥ऽ०ऽ॥०।०ऽऽ०ऽ०॥१॥षष्टेद्वितीय
लात्परके न्ते मुखलात्रु सयद्विपदनियमः चरमेद्वैप
चमके तस्माद्विह भवतिषष्टोलः॥ऽऽ०ऽ।०ऽ॥०ऽऽ०
॥ऽ०॥॥०॥॥०ऽ०॥॥ऽ०ऽऽ०॥ऽ०ऽऽ०॥।०।०ऽऽ०
ऽ०॥२॥त्रिषुंश्रकेषुपादो दलयोराद्येषु युद्रपते य
स्याः पथ्येतिनामतस्या छंदो विज्ञिस्समाख्यातम्
ऽऽ०।ऽ।०ऽऽ०॥ऽ०ऽऽ०।ऽ।०ऽऽ०ऽ॥ऽऽ०।ऽ।०ऽऽ०ऽऽ

॥४॥

०ऽऽ०।०ऽऽ०ऽ०॥२॥ संलंघ्य गणत्रयमाऽऽदिमं
शकलयोर्द्वयोर्भवति पादः। यस्यास्तां पिंगलना
गो विपुलामिति समाख्याति॥४॥ उभयार्द्धयोर्ज
कारौ द्वितीयतुर्यौ गमध्यगौ यस्याः। चपलेति ना
म तस्याः प्रकीर्तितं नागराजेन। पाश्चार्द्धं दलं स
मस्तं भजेत लक्ष्म चपलागतं यस्याः॥ शेषे पूर्वज
लक्ष्मा मुखचपला सोदिता मुनिना॥६॥ प्राक्प्र
तिपादितमर्द्धं प्रथमे प्रथमेतरे तु चपलायाः। ल

॥४॥

दमाश्रयेत सोक्ता विष्णुद्धीभिर्जघनचपला ॥ ९
॥ इत्यार्याप्रकरणम् ॥ आर्याप्रथमदलोक्तं य
दि कथमपि लक्षणं भवेदुभयोः दलयोः कृतय
तिशोभां तां गीतिं गीतवान् भुजंगेशः ॥ १ ॥ आर्या
द्वितीयकेऽर्धे यदुदितं लक्षणं तत्स्यात् ॥ यद्यु
भयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ २ ॥ आर्या
शकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ॥ सोद्गी
तिः किल गदिता तद्वद्यत्यंशभेदसंयुक्ता ॥ ३ ॥

आर्यापूर्वार्द्धं यदि गुरुणैकेनाधिकेन निधने युक्तं ॥ इतरत्तद्वन्निखिलं यदीयमुदितास्कधीभिरार्या गीतिः ॥४॥ इति गीतिप्रकरणं ॥ अथ षड्विषमेष्टौ समे कलास्ताश्च समे स्युर्नो निरंतराः ॥ न समो ऽत्र पराश्रिता कला वैतालीये ऽन्ते रलौ गुरुः ॥ ऽ।।ऽ०ऽ।ऽ०।०ऽ० ॥ ऽ।।ऽऽ०ऽ।ऽ०।०ऽ० ॥ ।।ऽ।।०ऽ।ऽ०।०ऽ० ॥ ऽऽऽऽ०ऽ।ऽ०।०ऽ० ॥ १ ॥ पर्यंते र्यौ तस्यैव शेषं त्वौपच्छंदसिकं सुधीभिरुक्तं ॥ ऽऽऽ०ऽ।ऽ० । ऽऽ० ॥ ऽऽ।।०ऽ।ऽ० । ऽऽ० ॥

10

२॥ आपातलिकाकथितेयंभाद्गुरुकावथ पूर्वव
दन्यत्॥ ३॥ तृतीययुग्दक्षिणांतिकासमस्तपादे
षु द्वितीयलः॥ ३॥ उदीच्यवृत्तिर्द्वितीयलः सक्तो
ऽन्येन भवेदयुग्मयोः॥ ४॥ पूर्वेणयुतोथपंचमः
प्राच्यवृत्तिरुदितेति युग्मयोः॥ ५॥ यदा समावोज
युग्मकौ पूर्वयो भवितितत्प्रवृत्तकं॥ ६॥ अस्य यु
ग्मरचिता परांतिकाथयुग्मवा चारुहासिनी॥
७॥ इति वैतालीयप्रकरणम्॥ वक्त्रं नाद्यान्नसौ

॥६॥

स्यातामऽब्धेर्मोऽनुष्टुभि ख्यातं ॥२॥ युजोर्जेन सरिद्भ
र्तुः पथ्यावक्त्रं प्रकीर्तितं ॥३॥ ओजयोर्जेन वारिधेस्त
देव विपरीतादिः ॥४॥ चपलावक्त्रमयुजोर्नकारश्चे
त्पयोराशेः ॥५॥ यस्याः लः सप्तमो युग्मे सा युग्मवि
पुला मता ॥६॥ सैतवस्याखिलेष्वपि सेनाद्यितो भा
द्विपुला ॥७॥ रस्यमन्यार्णवतुर्यात् ॥८॥ नो बुधैस्त्र्यन्त
विपुला ॥९॥ तोऽर्णवस्तत्पूर्वा स्याद्भवेत् ॥१०॥ इति वक्त्र
प्रकरणम् ॥ द्विकगुणितवसुलघुरचलधृतिरिति

॥६॥

॥ मात्रासमकं नवमो लांतं ॥ जो ल्हावण्णं बुधे विह्नि
कः ॥ तद्युगला द्वानवासिका स्यात् ॥ वाणं हनव
सुमदिलख्खिआ ॥ अड्ढिमुगाह्नस्वेदु पवित्ता ॥ यद
तीतकृतविविधलक्ष्मयुतं मात्रासमादिपादैः का
लितं ॥ अनियतवृत्तिपरिमाणसहितं प्रथितं जग
त्सु चरणाकुलकं ॥ इतिषोडशमात्राप्रकरणम् ॥
वृत्तस्य लाविना वर्णैर्णा वर्णो गुरुभिस्तथा ॥ गुरुवो
लिईलि नित्यं प्रमाणमिति निश्चितं ॥ इतिश्रार्याद्वि

॥७॥

त्वादिगुरुलघुनिर्देशः त्रिखगुणितदशलघुरचित
मपगतलघुयुगलमपरमिदमखिलं। सुगुरुशकल
युगलकमपि सुपरिघटितललितपदविततिभवा-
तिशिखा। विनिमयविहितशकलयुगललघुललि
तपदविततिरचितगणनिचया। श्रुतिसुखकृदि
यमपि जगति जुत्विरउपगतवति जिसति भवति
खजा॥ अष्टावङ्गा घ्नप्स्ता यस्यां सोक्ताऽनंगक्री
डा॥ दलमपि वसुगुणितसलिलनिधिलघुकविर

॥७॥

॥१८॥

च्चितपदविततिभवति। त्रिगुणनवलघुरवसितिगुरु।
रितिदलयुगकृततनुरतिरुचिरा॥ इति वृत्तरत्नाक
रमात्रावृत्तं नाम द्वितीयोध्यायः॥ छ॥ श्रीः इत्युक्ता॥ २॥
गौ स्त्री॥ इत्यत्युक्ता॥ २॥ मो नारी। रो मृगी॥ इति मध्या॥ ३॥
॥ मौ चेत्कन्या॥ इति प्रतिष्ठा॥ ४॥ भौ गिति पंक्तिः॥ जौ
गिति प्रीतिः॥ इति सुप्रतिष्ठा॥ ५॥ त्यौ चेत्तनुमध्या॥ य्यौ
शिवदनान्यौ। त्यौ चेद्वसुमती॥ इति गायत्री॥ ६॥ म्सौ गः
स्यान्मदलेखा। मधुपादिनगाः। कुमारललिता ज्सौ

॥८॥

म। सरगा हंसमाला ॥ इत्युष्णिक् ॥ ७ ॥ भौ गिति चित्रपदा
गः ॥ मो मो गो गो विद्युन्माला ॥ माणवकं भात्तलगाः ॥ म्नौ
गौ हंसरुतमेतत् ॥ नौ कलहंसरुतं गौ । जौ समानि
का गलौ च । प्रमाणिका जरौ लगौ । वितानमाभ्यां
यदन्यत् । नागरकं भरौ लगौ ॥ इत्यनुष्टुप् ॥ ८ ॥ राज्ञ
सा विति हलमुखी । भुजगशिशुसृता नौ मः ॥ इति बृ
हती ॥ ९ ॥ म्सौ ज्गौ शुद्धविराडिदं मतं । म्नौ य्गौ चेति प
णवनामेदं । ज्रौ रगौ मयूरसारिणी स्यात् । स्यादिदं

॥८॥

।।६।।

मयूरभाषिणी वा। म्भौ सगयुक्तौ रुक्मवतीयं। ज्ञेयाम
त्ता मभसगयुक्ता॥ नरजगैर्भवेन्मनोरमा। चंद्रकला
पा चेद्भमसा रगः॥ उक्ता हंसी मभनगसमं॥ इति पं
क्ति॥ त्रौ जौ गुरुणेयमुपस्थिता स्यात्॥ स्यादिंद्र
वज्रा यदि तौ जगौ गः। उपेंद्रवज्रा जतजास्ततो गौ।
अनंतरोदीरितलक्ष्मभाजः पादौ यदीयावुपजात
यस्ताः॥ इत्थं किलान्यास्वपि मिश्रितासु वदंति
जातिष्विदमेव नाम॥ पादेन पादत्रितयेन चास्याः

॥ए॥

कर्णार्द्धयोगेन षडेव भेदाः । इतीद्रमालाः किल पूर्वमि
श्राः प्रमाणतः षोडशभेदभिन्नाः ॥ न ज ज ल गैर्ग
दिता सुमुखी । दोधकवृत्तमिदं भभभाद्गौ । शालिन्यु
क्ता म्तौ तगौ गो ऽब्धिलोकैः । वातोर्मीयं गदिता म्भौ
तगौ गः । पंचरसैः श्रीर्भतनगगैः स्यात् । म्रौ म्लौ गः
स्याद्भ्रमरविलसितं । रान्नराविह रतोद्धता लगौ ॥
स्वागतेति रनभाद्गुरुयुग्मं । ननसगगुरुरचिता वृ
त्ता । ननन लघुगुरुभिः स्तु भद्रिका । श्येनिका रजौ र ॥ए॥

ल्लौ ततो गुरुः। उपस्थितमिदं ज्सौ ता ग्गुरू चेत्॥ मौ
क्तिकमाला यदि भतनाग्गौ॥ ११॥ इति त्रिष्टुप्॥
चंद्रवर्त्म गदितं तु रनभसैः। जतौ तु वंशस्थमुदी
रितं जरौ। स्यादिंद्रवंशा ततजैरसंयुतैः। इह तोट
कमंबुधिसैः प्रमितं। द्रुतविलंबितमाह नभौ
भरौ। वसुयुगविरति नौ म्यौ पुटोयं। प्रमुदितवद
ना भवेन्नौ च रौ। नयसहितौ न्यौ कुसुमविचित्रा। र
सैर्जसजसा जलोद्धतगतिः। भुजंगप्रयातं भवेद्यै।

॥२०॥

श्चतुर्भिः रैश्चतुर्भिर्युता स्रग्विणी संमता। भुवि भवेन्न
भजरैः प्रियंवदा। त्यौ त्यौ मणिमाला छिन्ना गुहव-
क्त्रैः। धीरैरभाणि ललिता तभौ जरौ। प्रमिताक्षरा
सजससैरुदिता॥ ननभररचिताऽभिहिता ज्वला
॥पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ॥ अब्ध्यङ्गैः।
स्याज्जलधरमाला म्भौ स्मौ॥ नयसयुगला स्याज्जल-
धरमाला॥ इह वनमालिनी नजभयैः स्यात्। स्वर-
क्षारविरतिर्नौ तरौ प्रभा। भवति नजावथ माल

॥२०॥

तीजरौ॥ प्रतिवदतामुरसं ननजनाद्यः॥ इति जगती॥ २
२॥ तुरगरसयतिर्नौ ततौ गः क्षमा॥ म्नौ ज्रौ गस्त्रिदश
यतिः प्रहर्षिणीयं॥ चतुर्ग्रहैरिह रुचिरा जभौ स्जौ गः
॥ ३ पदमः विस्पान्तैतौ तौ गुरुश्चौर्वशी म्तौ य्सौः सौ गौ ऽ
श्छिनवकैर्मत्तमयूरा॥ यमौ रौ विरम्यातां पंचरीका
वली गः॥ वेदै रंध्रैर्म्तौ यसगा मत्तमयूरा॥ सजसा
जगौ भवति मंजुभाषिणी॥ त्रितौ सजौ गौ भवति मत्त
हासिनी॥ ननततगुरुभिश्च चंडिका ऽश्ववर्तुभिः॥ म्त्रौ न्यौ

॥२२॥

गोऽच्छिन्नह विरतिरऽसंबाधा॥ इत्यऽतिजगती॥ म्रो

॥ म्नौन्सौ गौ वह्न्याह विरतिरऽसंबाधा॥ ननरसल

घुगैः स्वरैरऽपराजिता॥ ननभनलघुगैति प्रहरणक

लिका॥ उक्ता वसंततिलका तभजा जगौ गः॥ सिंहो

न्नतेयमुदिता मुनिकाश्यपेन॥ उद्धर्षिणीति कवि

राजवसुंधरेण॥ श्रीपिंगले नगदिता मधुमाधवीति

॥ इंदुवदना भजसनैस्सगुरुयुग्मैः॥ छि सतुच्छिद

ऽलोलाम्सौ म्नौ गौ भवेदेषा॥ छिः सतच्छिदऽलोला ॥२२॥

म्सौ ग्नौ गौ चरणे चेत्॥ इति शंकरी॥ २४॥ द्विहतह
यलघुरंध्रगितिशशिकला स्रगिति भवति रसन
वकयतिरियं वसुहयमतिरिह मणिगणनिकरः
॥ न नमृगयमयुते यंमालिनी भोगिलोकैः॥ भवति
नजौ भजौ रसहितौ प्रभद्रकं॥ सजनानयौ विशिरख
दशविरतिरैला॥ म्रौ म्यौ यांतौ भवेतां समसप्तभिश्चं
डसैना॥ चंडलेखाभिधा रो मो यौ स्वराऽऽज्ञाछिरामः
॥ नजभजरैर्विराजितमिदं मकेसरं॥ इत्यष्टि शाक्क

॥१२॥

री॥२५॥भ्रत्रिनगैः स्वरानृखमृषभगजविलसितं॥न
नमनयुगगैर्ऋषभगजविलसितं॥नजभजरैर्यदाभ
वतिवाणिनीगयुक्तैः॥लघुगुरुर्निरंतरंमदातद्वा
तभामरः॥पंचभकारकृतोऽप्ययतिर्यदिवोऽतगु
रुः॥इत्युष्टिः॥२६॥रसैरुद्रैश्छिन्नायमनसभला
गः शिखरिणी॥जसौजसयलावसुग्रहयतिश्चपृ
थ्वीगुरुः॥दिङ्मुनिवंशपत्रपतितंभरनभनलगैः
॥रसयुगहयैर्न्सौम्रौस्लौगोयदाहरिणीतदा॥

॥१२॥

मंदाक्रांताजलधिषडगैर्म्भौनतौतागुरूचेत्॥ यदिभ
वतोनजौभजजलागुरुणाकुटकं॥ मुनिगुहकार्णवैः
कृतयतिंवदकोकिलकं॥ इत्यष्टिः॥१७॥ नौजौ
यौभरसहितौकरिवाणैर्हरिनर्तनं॥ स्याद्भूतर्त्व
श्वैःकुसुमितलतावेल्लितामृतौनयौयौ॥ म्रौजसौभ
रसंयुतौकरिशरैःस्याद्धरणीस्कृता॥ नयुगलरच
तुष्टयोमानिशादिवसुच्छेदिनी॥ मत्तिकाकपि
तारमौजजभाङ्गवेदद्विरःपुनः॥ इतिधृतिः॥१८॥ रस

॥६३॥

॥१३॥

त्वेऽश्वैर्यस्मौ म्सौ ररगुरुः प्रयुता मेघविस्फूर्जिता स्यात्॥ सू

र्याऽश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितं। क

विवरैस्तरलं नभौ रसजाजगौ यदि तत्कृतं॥ इत्यऽति

धृतिः॥ १९॥ ज्ञेया सप्ताश्वषड्भिर्मरभनययुता म्लौ

गः सुवदना॥ त्रिरजौ गलौ नवैदिहैर्हशैर्नलक्षणेन वृ

त्तनाम॥ पाठांतरं॥ स्याद्रजौ रजौ रजौ गलौ यदाऽनुल

क्षणेन वृत्तनाम॥ उत्पलमालिका भरनभाभ्रलगा दृशा

मेघ्यतिर्भवेत्॥ ममरान्मौ यलगास्त्रयोदशानगैर्मत्तेभ ॥१३॥

विक्रीडितं ॥ इतिकृतिः ॥२०॥ म्रभ्नैर्यानां त्रयेण त्रिमुनि
यतियुता स्रग्धरा कीर्तितेयं । द्विगुणितनवलघुसग
णतति मिरिह कनकलता । नजभजजाजरौ यदि द
शशिवविश्रमणेन चंपका ॥ इतिप्रकृतिः ॥२१॥ म्रौ
नरनारनावथ गुरुर्दिगर्कविरतिः प्रभद्रकमिदं । स
तता नसमस्वरोगः फणितुरगयतिः स्यान्महास्रग्धरा
ख्या । सप्तभकाररयुतं गुरुणा च गताऽऽगतमेव लता
कुसुमं ॥ इत्याऽऽकृतिः ॥२२॥ यदिह नजौ भजौ ज्रभ

॥१४॥

॥२४॥

लगास्तदाऽम्बललितं शिवाऽर्कयतिकं ॥ मत्ताक्रीडं मो
नौ मौ न्लौ गिति भवति वसुशरदशयतियुतं ॥ छंखा
ऽऽख्यमिदं जगदुः कवयस्तगणजगणायदिषदच
लगौ ॥ इति विकृतिः ॥२३॥ भूतमुनी नैर्यतिरिह भतेन
स्नौ भनयाश्च यदि भवति तन्वी ॥ इति संस्कृतिः ॥२
४॥ क्रौंचपदाम्भौस्त्रौ ननननगा इषुशरवसुमुनिय
तिरिह भवेत् ॥ श्रुतितमशिखिभगुवसुमुनिविरतं
हंसलयं जगदुः कवयः ॥ इत्यभिकृतिः ॥२५॥ वस्वी

॥२४॥

ग्राऽम्बुच्छेदोपेतं ममतनयुगनरसलगैर्भुजंगविजृं
भितं। भवति धरण्यां न्यौ म्त्रौ नौ नौ यदीह नवरस
यतियुतमःपवाह्णगौ ।। मो नाः षट सगागिति य
दि नवरसरसशरयतियुतमःपवाहाख्या ।। ५ ।।
त्युत्कृतिः ।। २६ ।।

अथ दंडकः ।।

यदिह नयुगलं ततस्सप्तरेफास्तदा चंडवृष्टिप्रपातो
भवेद्दंडकः ।। प्रतिचरणविवृद्धरेफास्स्युरर्णार्णवव्या

॥२५॥

ल्जीमूतलीलाकरोद्दाममत्तांरवादयः॥ अचितकसम
भियोधीरधीभिः स्मृतोदंडको नन्दयाद्युत्तरैः सम
भिर्वैः॥ इतिवृत्तरत्नाकरे समवृत्तं नाम तृतीयोऽध्या
यः॥ छ॥ ३॥ विषमे यदि सौ सलगा दले भौ युजि भ
गुरुकावुपचित्रं। भत्रयमोजगतं गुरुकौ चेद्युजि च
नजौ ज्यपयुतौ द्रुतमध्या। विषमे ससजा गुरुः समे
सभरा लोऽथ गुरुर्वियोगिनी॥ सयुगात्सगुरू विष
मे चेज्जाविहवेगवती युजि भाज्जौ। ओजे तपरौ जरौ

॥२५॥

गुरुश्चेत् ॥ म्सौ जौ ग्नज विराड्वेदऽनोजे । असमे सजौ सगुरुयु-
क्तौ केतुमती समे भरनगाद्गः ॥ आख्यानिकी तौ ज्गुरू गोऽथ जे
जतावनोजे ज्गुरू गुरुश्चेत् ॥ जतौ ज्गौ गो विषमे समे स्यात्तौ ज्गौ
गणेषा विपरीतपूर्वा ॥ विषमे यदि मालभारिणी स्यात् ॥ ससजा
गो सभरा: समे सया: स्यु: । सद्युगात्सलघु विषमे गुरुर्युजि नभौ
च भरौ हरिणप्लुता ॥ अयुजि नयुगरेफतो यकारो युजि च नजौ
जरगाश्च पुष्पिताग्रा ॥ श्लोक ॥ वदंत्यपरवक्त्राख्यं वैताली
यं विपश्चित: । पुष्पिताग्राभिधं केचिदौपछंदसिकं तथा ॥

२६

॥ २ ॥ स्यादऽयुग्मके रजौ रजौ समे तु जरौ जरौ गुरुर्यदापरावती
यं ॥ विषमे यदि सौ जगौ भवेद्युजि सौ भौ यदि शोकवतीगो
॥ इति वृत्तरत्नाकरे र्द्धसमवृत्तन्नाम चतुर्थोध्यायः ॥ अथ
विषमवृत्तानि निरूप्यंते ॥ मुखपादेऽष्टभिर्वर्णैः परैस्मा
न्मकरालयैः क्रमाद्वृद्धः ॥ सततं यस्य विचित्रैः पादैः संप
न्नसौंदर्यं ॥ तदभिहितममलधीभिः पदचतुरूर्ध्वोऽभिधं
वृत्तं ॥ तथा ॥ प्रथममुदितवृत्ते ॥ विरचितविषमचरणभाजि
॥ सकललघुनि गुरुयुगलनिधनमाडा ॥ विधृतरुचिरपद ॥ २६ ॥

विततियतिरिति भवति पीडः॥ २॥ प्रथममितरच्चरणसमुत्थं श्रयति जगति लक्ष्म। इतरदितरजनितमपि यदि च तुर्यं॥ चरणयुगलकमविकृतमपरमिति कलिका स्यात्॥ ३॥ द्विगुरुयुतसकलचरणांता। मुखचरणगतमनुभवति च तृतीयः॥ चरणे द्वितीयलक्ष्म प्रकृतमपरमखिलमपि यदि भवति लवली सा॥ ४॥ प्रथममधिवसति यदि तुर्यं चरमच्चरणपदमवसिति गुरुयुग्मा॥ अपरमुपरितनसममिह भवति ललितपाद। त्रितयममृतधारा॥ ५॥ इति पदचतु

॥२७॥

रूढिप्रकरणं॥सजसा द्विमिसलघुकौ वा नसजगुरुकाश्च।

व्योद्धता। त्र्यंघ्रिगतभनजलागयुताः।सजसा जगौ चरम एक

तः पठेत्।१।चरणत्रयं भजति लक्ष्म यदि सकलमुद्गतभ

तं नौ भगौ भवति सौरभकं। चरणे यदि लमेव तस्तृतीयके

॥२॥नयुगं सकारयुगलं च भजति चरणं तृतीयकं। नतुदित

मुरुमतिभिर्ललितं। यदि शेषमस्य खलु पूर्वतुल्यकं॥३॥

॥२७॥

उद्गताप्रकरणं॥ म्सौ ज्सौ गौ प्रथमांघ्रिरेकतः पृथग

न्यत् । त्रितयं [illegible]मनजरगास्तथाननौसः । त्रिनपरिकलितजयै

प्रचुपितमिदमुदितमुपस्थितपूर्वं ॥ १ ॥ नौपादेप्यत्तृतीयके

सनौनसयुक्तौ । प्रथमांघ्रिकृतयतिःप्रवर्द्धमानं । त्रितयम

परमपिपूर्वसदृक्षमिह भवति । प्रततमतिभिरितिगदितं कि

लवृत्तं ॥ २ ॥ अस्मिन्नेवतृतीयपादकेतजराःस्युःप्रथमेच ।

विरतिरार्षभंवदंति । तच्छुद्धविराट्पुरस्थितं । त्रितयमपर

मपियदिपूर्वसमंस्यात् ॥ ३ ॥ ४ स्युपोस्थितप्रचुपितप्रक

॥१८॥

णं॥ विषमाक्षरपादत्वात् पादैरसमं जसं धर्मवत्। छंदो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तं॥ इति वृत्तरत्नाकरे विषमवृत्तनाम पंचमोध्यायः॥५॥ छ॥ श्री॥ छ॥

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः। यथोपरि तथा शेषं भूयः कुर्यादमुं विधिं॥१॥ ऊने दद्याद्गुरूनेवं यावत्सर्वलघुर्भवेत्। प्रस्तारोयं समाख्यातश्छंदोविचित्तवेदिभिः॥२॥ इति प्रस्तारः॥ नष्टस्य यो भवेदंकस्तस्या

॥१८॥

ऽर्द्धेर्द्धे समे चलः॥ विषमे चैकमादाय तदर्द्धेऽर्द्धे गुरुर्भवेत्॥ इति नष्टम्॥ उद्दिष्टं द्विगुणानाद्यादुपर्य्यंकान्समालिखेत्। लघुस्था ये तु तत्रांकास्तैः सैकैर्मिश्रितैर्भवेत्॥ इत्युद्दिष्टं॥४॥ वर्णान्वृत्तभवान्सैकानौत्तराधर्य्यतः स्थितान्॥ एकादिक्रमशश्चैतानुपर्युपरि निक्षिपेत्॥५॥ उपांत्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः॥ उपर्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया॥ इत्येकद्व्यादिलगक्रिया॥

॥२९॥

॥६॥ लगक्रियांकसंदोहे भवेत्संख्याविमिश्रिते। उद्दिष्टांऽक
समाहारः सैकोवाऽजनयेदिमां॥ इति संख्या॥७॥ संख्यैव द्वि
गुणैको नामसञ्ज्ञिरऽध्वा प्रकीर्तितः। वृत्तस्यांगुलिकी व्याप्तिरऽ
ऽधः कुर्यात्तथांगुलं॥ इत्यध्वा॥८॥ प्रस्तारो नष्टमुद्दिष्टमे
कद्व्यादिलगक्रिया। संख्यानमःऽध्वयोगश्च षडेते प्रत्यया
स्मृताः॥९॥ वंमेऽभूत्काव्यपपस्य प्रकटगुणगणः श्री वसिष्ठं

॥२९॥



तवेत्ता॥ विप्रः पद्येकनामा विपुलतरमतिर्वेदतत्वाऽवबो॥
धी। केदारस्तस्यसूनुः शिवचरणयुगाराधनैकाग्रचित्तः स्त्वं
दृत्तेनाऽभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यं॥ इतिवृत्त
रत्नाकरे षट्प्रत्ययो नाम षष्ठोऽध्यायः॥ १०॥ इति वृत्तर
त्नाकर छंदः शास्त्रं समाप्तं॥ शुभंमस्तु॥ मंगलंभूयात्॥
संवत् १८७४ मिती आषाड सुदि ८ लिप्यकृतं पंडितचत्र
भुजनागपुरमध्ये लिखापितं

[OrderDescription]
,CREATED=02.07.20 11:56
,TRANSFERRED=2020/07/02 at 12:06:13
,PAGES=39
,TYPE=STD
,NAME=S0003255
,Book Name=M-1798-VRITRATNAKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,